# Natya Shastra Chapter 26

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૬

## Document Information

Text title : naaTyashaastra adhyaaya 26

File name : natya26.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : November 23, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૬

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
ષડ્વિંશોઽધ્યાયઃ
અનુરૂપા વિરૂપા ચ તથા રૂપાનુરૂપિણી ।
ત્રિપ્રકારેહ પાત્રાણાં પ્રકૃતિશ્ચ વિભાવિતા ॥ ૧॥

નાનાવસ્થાક્રિયોપેતા ભૂમિકા પ્રકૃતિસ્તથા ।
ભૃશમુદ્યોતયેન્નાટ્યં સ્વભાવકરણાશ્રયમ્ ॥ ૨॥

બહુબાહૂબહુમુખાસ્તથા ચ વિકૃતાનનાઃ ।
પશુશ્વાપદવક્ત્રાશ્ચ ખરોષ્ટ્રાશ્ચ ગજાનનાઃ ॥ ૩॥

એતે ચાન્યે ચ બહવો નાનારૂપા ભવન્તિ યે ।
આચાર્યેણ તુ તે કાર્યા મૃત્કાષ્ઠજતુચર્મભિઃ ॥ ૪॥

સ્વાભાવિકેન રૂપેન પ્રવિશેદ્રઙ્ગમણ્ડલમ્ ।
આત્મરૂપમવચ્છાદ્ય વર્ણકૈર્ભૂષણૈરપિ ॥ ૫॥

યાદૃશં યસ્ય યદ્રૂપં પ્રકૃત્યા તત્ર તાદૃશમ્ ॥

વયોવેષાનુરૂપેણ પ્રયોજ્યં નાટ્યકર્મણિ ॥ ૬॥

યથા જીવત્સ્વભાવં હિ પરિત્યજ્યાન્યદેહિકમ્ ।
પરભાવં પ્રકુરુતે પરભાવં સમાશ્રિતઃ ॥ ૭॥

એવં બુધઃ પરંભાવં સોઽસ્મીતિ મનસા સ્મરન્ ।
યેષાં વાગઙ્ગલીલાભિશ્ચેષ્ટાભિસ્તુ સમાચરેત્ ॥ ૮॥

સુકુમારપ્રયોગો યો રાજ્ઞામામોદસંભવઃ ।
શ◌ૃઙ્ગારરસમાસાદ્ય તન્નારીષુ પ્રયોજયેત્ ॥ ૯॥

યુદ્ધોદ્ધતાવિદ્ધકૃતા સંરંભારભટાશ્ચ યે ।

ન તે સ્ત્રીભિઃ પ્રયોક્તવ્યાઃ યોક્તવ્યાઃ પુરુષેષુ તે ॥ ૧૦॥

અનુદ્ભટમસંભ્રાન્તમનાવિદ્ધાઙ્ગચેષ્ટિતમ્ ।
લયતાલકલાપાતપ્રમાણનિયતાક્ષરમ્ ॥ ૧૧॥

સુવિભક્તપદાલાપમનિષ્ઠુરમકાહલમ્ ।
ઈદૃશં યદ્ભવેન્નાટ્યં નારીભિશ્ચ પ્રયોજયેત્ ॥ ૧૨॥

એવં કાર્યં પ્રયોગજ્ઞૈર્ભૂમિકાવિનિવેશનમ્ ।
સ્ત્રિયો હિ સ્ત્રીગતો ભાવઃ પૌરુષઃ પુરુષસ્યચ ॥ ૧૩॥

યથા વયો યથાવસ્થમનુરૂપેતિ સા સ્મૃતા ।
પુરુષઃ સ્ત્રીકૃતં ભાવં રૂપાત્પ્રકુરુતે તુ યઃ ॥ ૧૪॥

રૂપાનુરૂપા સા જ્ઞેયા પ્રયોગે પ્રકૃતિર્બુધઃ ।
છન્દતઃ પૌરુષીં ભૂમિં સ્ત્રી કુર્યાદનુરૂપતઃ ॥ ૧૫॥

ન પરસ્પરચેષ્ટાસુ કાર્યૌ સ્થવિરબાલિશૌ ।
પાઠ્યપ્રયોગે પુરુષાઃ પ્રયોક્તવ્યા હિ સંસ્કૃતે ॥ ૧૬॥

સ્ત્રીણાં સ્વભાવમધુરાઃ કણ્ઠાઃ પુંસાં તુ બલવન્તઃ ।
યદ્યપિ પુરુષો વિદ્યાત્ ગીતવિધાનં ચ લક્ષણોપેતમ્ ॥ ૧૭॥

માધુર્યગુણવિહીનં શોભાં જનયેન્ન તદ્ગીતમ્ ।
યત્ર સ્ત્રીણાં પાઠ્યાદ્ગુણૈર્નરાણાં ચ કણ્ઠમાધુર્યમ્ ॥ ૧૮॥

પ્રકૃતિવિપર્યયજનિતૌ વિજ્ઞેયૌ તાવલઙ્કારૌ ।
પ્રાયેણ દેવપાર્થિવસેનાપતિમુખ્યપુરુષભવનેષુ ॥ ૧૯॥

સ્ત્રીજનકૃતાઃ પ્રયોગા ભવન્તિ પુરુષસ્વભાવેન ।
રમ્ભોર્વશીપ્રભૃતિષુ સ્વર્ગે નાટ્યં પ્રતિષ્ઠિતમ્ ॥ ૨૦॥

તથૈવ માનુષે લોકે રાજ્ઞામન્તઃપુરેષ્વિહ ।
ઉપદેષ્ટવ્યમાચાર્યૈઃ પ્રયત્નેનાઙ્ગનાજને ॥ ૨૧॥

ન સ્વયં ભૂમિકાભ્યાસો બુધૈઃ કાર્યસ્તુ નાટકે ।
સ્ત્રીષુ યોજ્યઃ પ્રયત્નેન પ્રયોગઃ પુરુષાશ્રયઃ ॥ ૨૨॥

યસ્માત્સ્વભાવોપગતો વિલાસઃ સ્ત્રીષુ વિદ્યતે ।
તસ્માત્સ્વભાવમધુરમઙ્ગં સુલભસૌષ્ઠવમ્ ॥ ૨૩॥

લલિતં સૌષ્ઠવં યચ્ચ સોऽલઙ્કારઃ પરો મતઃ ।
પ્રયોગો દ્વિવિધશ્ચૈવ વિજ્ઞેયો નાટકાશ્રયઃ ॥ ૨૪॥

સુકુમારસ્તથાવિદ્ધો નાનાભાવરસાશ્રયઃ ।
નાટકં સપ્રકરણં ભાણો વીથ્યઙ્ક એવ ચ ॥ ૨૫॥

જ્ઞેયાનિ સુકુમારાણિ માનુષૈરાશ્રિતાનિ તુ ।
સુકુમારપ્રયોગોऽયં રાજ્ઞામામોદકારકઃ ॥ ૨૬॥

શૃઙ્ગારસમાસાદ્ય સ્ત્રીણાં તત્તુ પ્રયોજયેત્ ।
યુદ્ધોદ્ધતાવિદ્ધકૃતાસંરંભારભટાશ્ચ યે ॥ ૨૭॥

ન તે સ્ત્રીણાં પ્રકર્તવ્યાઃ કર્તવ્યાઃ પુરુષૈર્હિ તે ।
યથાવિદ્ધાઙ્ગહારં તુ ભેદ્યભેદ્યાહવાત્મકમ્ ॥ ૨૮॥

માયેન્દ્રજાલબહુલં પુસ્તનૈપથ્યદીપિતમ્ ।
પુરુષપ્રાયસંચારમલ્પસ્ત્રીકમથોદ્ધતમ્ ॥ ૨૯॥

સાત્વત્યારભટીઇયુક્તં નાટ્યમાવિદ્ધસંજ્ઞિતમ્ ।
ડિમઃ સમવકારશ્ચ વ્યાયોગેહામૃગૌ તથા ॥ ૩૦॥

એતાન્યાવિદ્ધસંજ્ઞાનિ વિજ્ઞેયાનિ પ્રયોક્તૃભિઃ ।
એષાં પ્રયોગઃ કર્તવ્યો દેવદાનવરાક્ષસૈઃ ॥ ૩૧॥

ઉદ્ધતા યે ચ પુરુષાઃ શૌર્યવીર્યસમન્વિતાઃ ।
યોગ્યઃ સ ચ પ્રયત્નઃ કર્તવ્યઃ સતતપ્રમાદેન ॥ ૩૨॥

ન હિ યોગ્યયા વિના ભવતિ ચ ભાવરસસૌષ્ઠવં કિંચિત્ ।
સંગીતપરિક્લેશો નિત્યં પ્રમદાજનસ્ય ગુણ એવ ॥ ૩૩॥

યન્મધુરકર્કશત્વં લભતે નાટ્યપ્રયોગેણ ।
પ્રમદાઃ નાટ્યવિલાસૈર્લભતે યત્ કુસુમૈર્વિચિત્રલાવણ્યમ્ ।
કામોપચારકુશલા ભવન્તિ ચ કામ્યા વિશેષેણ ॥૩૪॥

ગીતં વૃત્તં તથા વાદ્યં પ્રસ્તારગમનક્રિયા ।
શિષ્યનિષ્પાદનં ચૈવ ષડાચાર્યગુણાઃ સ્મૃતાઃ ॥ ૩૫॥

એતાનિ પઞ્ચ યો વેત્તિ સ આચાર્યઃ પ્રકીર્તિતઃ ।
ઊહાપોહૌ મતિશ્ચૈવ સ્મૃતિર્મેધા તથૈવ ચ ॥ ૩૬॥

મેધાસ્મૃતિર્ગુણશ્લાઘારાગઃ સંઘર્ષ એવ ચ ।

ઉત્સાહશ્ચ ષડેવૈતાન્ શિષ્યસ્યાપિ ગુણાન્ વિદુઃ ॥ ૩૭॥

એવં કાર્યં પ્રયોગજ્ઞૈર્નાનાભૂમિવિકલ્પનમ્ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ સિદ્ધીનામપિ લક્ષણમ્ ॥ ૩૮॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે વિકૃતિવિકલ્પો
નામ ષડ્વિંશોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 26*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*